दस्मृता श्चात्रव घ्रहस्य संसदा कठिनद्रा ह्रिता नामेत तपंक का सुभगारूपधरा अ
ति कोमुदी त्रिमत माघा देवा सपत्निका ॥१॥ त्र्यथमतः पुछने कठिनं हो तं पुनर
होपादेश निवेशानम वदति दीनमसपं वचनवघ्र कठिनता विवचना विडुषा हतं ॥

मेड

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

ॐ नमः श्रीगणेशाय नमः श्रीनागोजिभट्टाय नमः पातंजले महाभाष्ये कृतभूरिपरिश्रमः ॥ शि
वभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः १ याचकानां कल्पतरोररिकक्षहुताशनात्
शृंगवेरपुराधीशाद्रामतो लब्धजीविकः २ नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकं
मनोरमोमार्धदेहं लघुशब्देन्दुशेखरं ३ ग्रंथसमाप्तिग्रंथप्रचारादिप्रतिबंधकदुरि
तप्रशमाय समुचितमृषित्रयनमस्काररूपं मंगलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रो
तॄणामनुषंगतो मंगलाय च निबध्नाति मुनित्रयमिति कारकविभक्तेर्बलवत्त्वाद्द्विती
या परिभाव्येति तच्छब्दस्य बुद्धिस्थपरामर्शकत्वात्प्राचामुक्तीस्तिरस्कृत्येत्यर्थः
मुनित्रयोक्तीर्विचार्येत्यर्थो वा परिभावस्तिरस्क्रियेति कोशात्तिरस्कारार्थस्य धातोर्विचा
रार्थत्वेऽपि न बाधकं धातूनामनेकार्थत्वात् अतएव परीभुवो वज्ञान इति संगच्छते
एतेन स्वग्रंथस्य प्राचीनग्रंथैरगतार्थत्वं समूलत्वं च ध्वनितं भाविनोऽपि बुद्ध्या विषयी
करणाद्धियमिति निर्देशः सिद्धान्तप्रकाशकत्वेनातिदुरूहग्रंथान्तरेभ्यः सिद्धांतज्ञा
नेजायमानस्य लोकस्य शारूपसंतापस्य शामकत्वेन च कौमुदीसादृश्यं अनेन वैयाक

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

पटेवैयाकरणोञ्चित्स्वरहलुनत्तस्यैवचकारसदृशत्वेपितत्वाभावात्॥ विभक्त्यादिसंज्ञापिसूत्रान्त
र्गतेनामेवेतितत्रैवनविभक्ताविस्यादीनांप्रवृत्तिः॥ अतएवेदमइञ्झित्यादावणत्वात्सवर्ण
ग्रहणंप्राप्तमप्रत्ययइत्यनेननिषिध्यतइतिभाष्योक्तंसंगच्छते॥ प्रत्वनेकाल्स्त्रइञ्झिञ्झिग्र
हणाभावेपिशित्करणादेवसर्वादेशत्वमितिभाष्येउक्तं॥ तस्यसंज्ञेकप्राकारकरणादभूत
पूर्वोनेकाल्त्वमादायसर्वादेत्वमित्यर्थइतिनत्तद्विरोधः॥ अत्रकेचिदनुबंधाअनेकांताः
अनवयवाःयोह्येकांतःसकदाचित्तत्रोपलभ्यतएवायंतुनतथातदधर्मत्तेविधेयकदाप्यद
र्शनात्॥ हलंत्यमित्यत्रान्त्यशब्दःपासमीपबोधकक्षुटइत्यादौ आदिशब्दःपूर्वसमीपबोध
कोनेकाल्शिदित्यादौसमीपसामीप्यमूलकावयवत्वारोपणवहुव्रीहिः॥ स्यसंचेदमुपदेशेऽजि
तिसूत्रेभाष्ये॥ मपर्यन्तस्येतिसूत्रेकैयटेचेत्तेनडाणलादाविशादौचनदोषः॥ अतएवोपदेशे
ऽजितिसूत्रेउपदेशग्रहणंचरितार्थंतद्धि अम् औ अठित्तइत्यादावादिर्ञिटुडवइतीत्प्रतिषेधाभा
वाय अनेकान्तत्वेहितत्वापिसिस्याहुः॥ पोत्केकान्तएवशास्त्रेतत्रोपलंभादन्यत्रानुपलंभा
वे॥ अनवयवोहिकाकादिरेकजातीयसंबंधेनात्रहृदादिषूपलभ्यतेनैवमयं॥ किंचा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

नवयवत्वेनशाकप्रत्ययादेशादेरित्वानापत्तिप्रत्ययादित्वाभावात्॥ एवमन्त्यत्वाभावादिशादेः
शास्त्वानापत्तिः॥ उक्तार्थेलाक्षणिकत्वेतुलक्षणैवदोषः किञ्च दन्नचप्रकारावेपर्याप
त्यावयवत्वमेवन्याय्यम्॥ अतएववृद्धौ णकठञिति सूत्रविहितत्वेनत्वप्रयुक्ता वृद्धिर्न
॥तस्यलोपइतिभाष्येएकान्तत्वमेवन्याय्यमित्युक्तेप्रत्ययापदेशाञिति सूत्रेउपदेशग्रहणंतस्य
स्वार्थमेवत्याहुः॥ सर्वत्रानुबन्धसहितनिर्देशाविधेयोगुप्तिज्किदित्यादौ नकारे संज्ञकः सोमवर्ती
त्यादिक्रमेणबोध्यः॥ अनुवादेसन्यत्तइत्यादौ चनकारे संज्ञके सशब्देपरइत्यादिक्रमेणबोध्यः
स्पष्टंचेदंनिष्ठासंज्ञासूत्रेभाष्ये॥ अतएवाटप्रेत्यादेनीसम्पत्तिः अन्यथापूर्वादसूत्रेतत्रेनाच्य
रोनेष्यतेचतत्रवृद्धिः॥ पत्नुप्रयोगेइष्यतेवृद्धिस्तत्रनाडित्तितदसंगतिः स्पष्टैव॥ अत्रोकिंवाचा
लेः हलिकिंचिरिणीतीत्यादौधातोरन्त्यसमामहत्॥ आद्योच्चारणमिति॥ आद्यमुच्चारणमित्य
र्थः॥ भावेघञितिभावः तत्प्रत्ययसत्वेतत्कार्यप्रवृत्तिकाचापरिणामेवाघनं चारोत्तत्वं प
ज्ञापकत्वंउपस्यादघर्येत्वादिशास्त्रोच्चारणकिपत्वात्॥ अतएवएकाचउपदेशइतिसूत्रेकैप
टेनोक्तमित्संज्ञाविधावुच्चारणवचनउपदिष्टिर्गृह्यतेइति॥ आदेचइतिसूत्रेपियेषांस्वर

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

सूत्रमव्रत्यासुप्तिङ्रूपविभक्तिपदार्थज्ञानं सुलभमितिदिक् ॥ अत्राप्युपदेश इति संबध्यते
तदुल्लब्धमाह ॥ सूत्र इति ॥ आदिरन्त्येन ॥ आदिरिति किम् ॥ अन्त्यशब्देन पूर्वेषामाक्षेपादि
गादिप्रत्याहारे ऽकारादिग्रहणं मा भूदिति ॥ एवमादिशब्देन परेषामाक्षेपात् ॥ इणादिप्रत्याहा
रेष्वुमादीनां ग्रहणं मा भूदिति संस्येनेति उभयोपादानेन तु अन्त्यमादिं तावत्सु केवद्धिशब्दमपि किं
चिद्वर्त्तीति नियमेन प्रतीतेः ॥ यस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः पूर्वस्मिन्सति यस्मा
त्परो नास्ति सोऽन्त्य इति अकारादिग्रहणे इकार एकारादीनामाद्यन्तत्वस्यैवानापत्तेः ॥ अत्रा
द्यन्तपदाभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः संज्ञीति स च लक्ष्ये प्रयो
गाभावात्स्यैकं संज्ञित्वं तस्य तु न तत्कापत्तिस्य संज्ञालोपाभ्यामपहारात् ॥ एतत्फलितक
थनमेव भाष्ये मध्ये च स्वस्य च रूपस्येति ॥ स्वमित्यनुवृत्तिपरत्वेन व्याख्यानं तु हेयमे
वानुवृत्तौ फलाभावात् ॥ इत्तेति किम् ॥ नमङ्णानेति [illegible]कारादिभिः प्रत्याहारो मा भू
ग्रहर दिति ॥ सहैव णानां समुदाय एव संज्ञेति समुदायादेवैकदेशस्यादौ विभक्त्युत्पत्तिर्नादिमात्रात्
॥ नचान्त्यस्य संज्ञालोपाभ्यामपहारादादिरन्त्येनेत्यसंगतम् ॥ सूत्रे त्वित् संज्ञायामपि इगादिशा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

देघुत्तरभावात् ॥ अन्येनेत्यस्येदन्त्यमदृष्टेनेत्यर्थात् ॥ व्यक्तिपक्षे एवमेवौचित्यात्सादृश्यमूलि
कैव चात्रनत्वप्रत्यभिज्ञेत्याहुः ॥ अचि[illegible]श्नुधात्विति सूत्रे [illegible]इणङ्सेव सिद्धे य्वोरिति निर्देशाद्
एपरोगौवेत्ति लण्सूत्रे भाष्यस्वरसम् ॥ हलन्त्यम् ॥ अत्र पदद्वयं समासे न्त्यशब्दस्य पूर्वनिपातापत्तेः ॥
कर्मधारयोप्ययपदानां समासाभावस्य सूत्रकारशैलीसिद्धत्वाच्च ॥ यद्यपि सर्वोपि हल्तत्तत्समुदाये
प्रत्यन्त्यो भवति तथाप्यन्त्यपदोपदेशपदाभ्यां प्रत्यासत्त्याज्ञातस्वस्वरूपज्ञापकोच्चारणविषय
समुदायप्रत्यन्त्य एवेह गृह्यते ॥ अत एव मकारे संज्ञापरित्राणार्थस्य मोरूकारश्रवरित्यार्थः समुदा
योपदेश एव सर्वत्रानुषित्तात्पर्यमाणवपवानानांत[illegible]पकतयातेषामुज्ञातस्वस्वरूपकत्वाभावा
त् ॥ उपदेशेन्त्यमिति ॥ तत्र विद्यमानमन्त्यमित्यर्थः ॥ तेना इउण् त्यादेरणादौ नाहल्त्वमसाहारसि
[illegible]प्रयुक्तं तत्सिद्धिः ॥ अन्यत्र वर्तत इणि त्वात्रापच्चाणे नाभिव्यक्तस्य तत्र व्यवधाने नैव संज्ञा ॥ पदा
र्थोपस्थितिरनुबंधविनिर्मुक्तस्यैव ॥ उपदेशोत्तरकालेत्संज्ञेति नाजूलाविति सूत्रे भाष्यात् ॥
धुडित्यादौ सानुबंधाद्विभक्तिस्तु तेनैवानुबंधविनिर्मुक्तोपस्थितेस्तस्यैवार्थवत्त्वात्सुल
भा ॥ इत्संज्ञाकार्यं तु यत्र संज्ञा तत्रैव न चैव स्यात् ॥ तदुपस्थाप्यएवस्यपदं चेदंत्तित्स्वीत्तमित्यात्र[illegible]के

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

ल.श.
१५

शास्त्रे नासिकायां भवद्त्वर्यकान्नासिकाशब्देन व्यवहारः यत्त्वनुस्वारयमानां च नासिका
स्थानमिष्यते इति शिक्षोक्तेरेषां नासिकाकरणं किंच स्थानत्वे कङयोः सावर्ण्यापत्तिरि
यावत्स्थानैक्याभावात् यत्किंचित्स्थानैक्येन तत्त्वे तु ञमानामपि परस्परसावर्ण्यापत्तिरिति प्रतीतेः
तन्न कंठादीनामपि करणत्वस्यैवास्यत्वे तेन वर्णानामिति भाष्यात् स्थानत्वव्यवहारस्तु
वर्णाभिव्यक्तिजनकताल्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण तत्तत्
स्थाने जिह्वाग्रादिसंबंधेन वर्णोत्पत्त्या जिह्वाग्रादौ तत्संबंधजनकप्रयत्नविशेषस्य
च तादृशकरणत्वव्यवहारः वर्णाभिव्यक्त्यनंतरभावी साऽऽवर्णानुपयुक्तश्वासान्तरत
स्यपरीक्षोपयुक्तस्य कंठविवरादिनिष्ठविकासादेरास्य बहिर्देशावच्छिन्नकार्यस्य ज
नको प्रयत्नो गुणशब्देनोच्यते प्रकारादिनिष्ठस्तु नासिकस्यभेदकतागुणस्य त्यादौ
गुणत्वेन व्यवहारस्तु कंठाद्यवच्छिन्नवायुसंयोगो नोत्पन्नो यः नासिकावच्छिन्नवायु
संयोगेन तद्रूपधर्मोत्पत्त्या एवं च नासिकायास्तत्रगुणजनकत्वात्तु नासिकाकारा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

तन्नत्स्थानादौ जिह्वास्पर्शायत्नभवे न तत्तद्वर्णनापि

कस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारेऽपि तथाकारादीनामुच्चारणेन नेति भावः कर
चयोस्तु न सावर्ण्यं यावत्स्थानसाम्याभावात् भिन्नस्थानकयोर्नैवेयमपि तेन अत्र कं
ठपदं कंठस्थानं तत्समीपं जिह्वामूलस्थानोभयपरं तेन कंठ्योर्विहोः जिह्वामूलेनतु कुप्योः क
इति शिक्षया न विरोधः जिह्वामूलीयपदस्य च वर्णविशेषे रूढिरिति न व्यवहाराति
प्रसंगः अत एवायोगवाहेषु जिह्वामूलीयगणनं भाष्ये न तत्तद्वर्णान्यत्तेः आकुं तत्तत्स्था
नत्वनिर्णयेऽप्यकुहस्तादिकथनं साधारणधर्मबोधनायानुवादकं न त्वेतदेवकंठादि
स्थानविधायकमिति भ्रमितव्यं विसर्जनीयपदनात्र साहचर्याद्कारादिमात्र यस्य तस्य
ग्रहणम् अतएवायोगवाहा विज्ञेया आश्रयस्थानभागिन इति शिक्षया न विरोधः दंता
इति दंतसंयुक्तदेशाद्रस्पर्शः अतो भग्नदंतस्याप्युच्चारणं भवत्येव उपध्मापनेन
नेन तत्र भवइति योगेनोपध्मानीयस्योष्ठ्यत्वमित्याह उपपेति रूढत्वाच्च न व्यवहारा
तिप्रसंगः नासिक्यं चेति चेन स्वस्ववर्गीयनिकूलं ताल्वादिग्रहणं ते अत एवेषां प्राति

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

दुत्तरपदप्रकृतिस्वरेणवान्तोदात्तत्वम् एकस्मिन्नच्युदात्तत्वानुदात्तयोर्धर्मिण्येमेलन
विरोधादाह वर्णधर्मावितिवाक्ल्लकादधिकरणेयत्न् अर्शीयजित्यस्येइयंत्रिसूत्रीस्व
व्याप्यीलोकवेदयोरुदात्तादिव्यवहारस्यप्रसिद्धत्वात् ह्रस्वग्रहणमितिह्रस्वपदघटित
ग्रहणमित्यर्थः अतंत्रमितिस्वशास्त्रसंकेतितरूपेणबोधकमित्यर्थः किंत्वर्धमात्रा
रूपार्थबोधकमितिभावः एवंच दीर्घादिष्वप्यर्द्धमात्रैवोदात्ताइत आरभ्य नवसूत्री
अत्रइत्सतः प्राग्उत्कर्षेणास्यत्रिपाद्यामपिप्रवृत्तिः सर्वं चेदं भाष्ये स्पष्टम् अर्द्धमु
दात्तमिति वृत्तिस्तु सत्यासत्यभामेतिवत् व्याख्येया उत्तरार्द्धमित्यस्य चार्द्धमात्रातो
विशिष्टउत्तरोभागइत्यर्थः वेदेजयथाप्रयोगंज्ञातिशाखादस्माद्व्यवस्था तस्येत
तिअनुदात्तस्येत्यर्थः उदात्तेति उदात्तस्वरितयोः परत्वे सतीत्यर्थः तयोः परत्वे चो
पस्थितानुदात्तास्येदृयेव अन्यत्रोदात्तस्वरितयोः परत्वाभावे प्रातिशाख्ये इति लोकेन

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

क्वेति किमोऽत्र वृत्त्यभावे त्यत क्वातीति क्वादे तत्स्वरितमिति स्वरितः दीर्घं तमुदाहरति १

नुदात्त एवेति भावः ह्रस्वस्वरितमुदाहरति स्थानामिति येराइति स्वरितो वानुदात्ते पदादावि
त्येकारः स्वरितः तोदात्तस्वरितोदयमिति निषेधस्त्वदात्तादनुदात्तस्य स्वरितत्वमस्येवानन्तर
स्येति न्यायात् स्वरितपरमुदाहरति शतचक्राणीति हरितस्पर्धे बहुस्येतस्पर्धः बहुसि
वावचनं प्राङ्णौ च स्वरुपधायाइति वचनान्नुणभावः उदात्तस्वरितयो रिति स्वरितः उदात्त
यणोह लर्वीदितिन छंदसत्वात् यच्छन्दः फि बइत्यं तोदात्तः तदेकादेशस्त्र्वा स्वरितः सइ
ति उदात्तादि ह्रस्वादिसंज्ञक इत्यर्थः मुखा उच्यते सोवचनः वा कुलकात्कर्म मुख
सहिता नासिकेति विग्रहः तयावचनइति साधने कृतेति समासस्त्वदाहमुखसहितेतिया
मुखेनेति किम् यमानुस्वाराणामेव प्रसज्येत न एवं चाङ्गो नृ नासिक इत्यत्रानुस्वारः स्यात् ना
सिकेति किम् शक्तेत्यादावनुदात्तोपदेशेत्यादिना कलोपो माभूत् द्वादशेति यद्यपीदं
न व्याप्ति पक्षे व्यक्तीनामानन्त्यात् तथाप्यष्टादश धर्मवत्त्वमकार जातीयादेरित्यर्थः ह्रस्व
त्वादीनां तत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनामभेदमाश्रित्येदं बोध्यम्

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

प्रयत्नस्य ध्यपदेशात् प्रकृष्टोयत्नश्चाभ्यंतरः तस्य वर्णो मत्स्यव हितप्रा भावित्व

सा ननेव प्रयत्नस्य ध्य (gloss, top)

एवमग्रेपि ऌवर्णस्येति विवृतस्येत्यर्थः तेन ऌतिऌवेति विधेयस्येव तस्यच स्य दीर्घत्वे
पिनहानिः दीर्घाभावादिति अतएवतुल्यास्यसूत्रे भाष्ये ऌतिसवर्णे इत्यनेन नपदेद्विल
कारकाभावे ऋः सवर्णे इति दीर्घत्वेहोतृ कारइतिऋकारघटित प्रयोगः संगच्छते ह्रस्वाभावा
दिति इत्थमेवोक्ति स्यात्तैभाष्ये स्वच्छं गानशेदनादौ च तृमीत्रार्द्ध मात्राद्दीनामपलंभेपि शास्त्री
यकार्ये उपयोगाभावात् लोके प्रयोगेष्व प्रयोगाच्च नोक्तः अतएवानुहात्ततरस्यानुहात्तः
एकश्रुतेः स्वरांतरत्वेइत्थपलहस्तं तस्यालोकेपि सत्वात् तुल्यास्य तुल्यावास्य प्रयत्नो
र्यस्येत्यर्थः आस्ये भवमास्यं व्याख्यानात् तत्र वर्णोपपो गित्वं स्य प्र ... स्यान
मेव प्रयत्नस्य पृथगुपादानात् प्रकृष्टो यत्नः आभ्यंतरस्तस्य वर्णोत्पत्त्यव्यवहितप्राग
भावित्वरूपप्रकर्षवत्वात् जनकत्वं च ध्यार्थः तत्तत्कार्यगतभेदस्यानेकाशेष्य भेद
घटितनुल्यत्वस्य निर्वाहः स्यचं चेदं भाष्ये तदाहत्ता त्वादीति शीतायां कंठादीनां कंठ
त्वादिनेव स्थानत्वो मातद्रूपेणैवास्य भवशाब्दे नग्रहणमिति तद्भागभेदमादाय नोदा
वात्ततस्वास्यत्वेन भेदघटितमिति भाष्यसंमतमिति निकाशिका द्वयं २

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

लक्षे. १२

त्वादिषु सावर्ण्यभंग इति वाच्यं यस्येन तद्वयं येन यत्नीयेने तत् द्वये ननु स्थानित्वर्षा यत्न
ध्येकेषामिति निर्देशा धावस्यास्यभव तुल्यत्वं ग्रास्यं अन्तरा वै चों सावर्ण्यमाशंकने तो तु ल्या
स्यस्थानावितिभाष्ये समाहितम् अन्तरएव वलयोर्न सावर्ण्यंते न तद्वा नासामित्या क्षेतो र्ली
तिन अन्तरएव प्रयत्नशब्देन यत्नमात्रग्रहणमिति प्रतीयते किंचित्स्पृष्टत्वेकमादाय सवर्ण
संज्ञेत्यर्थो ऋ वो ऋ रिसवर्ण इति सवर्णग्रहणेन ज्ञापकेन साधितो भाष्ये तेन स्थानांशे याव
त्स्थानसाम्य इत्येव स्वारसिकोर्थः प्रतीयते न च यावदास्यभवतुल्यत्वविवक्षणे प्रयत्नग्र
हणं व्यर्थं प्रयत्नस्यास्यभवत्वादिति वाच्यं ह्रस्वदीर्घयोः सावर्ण्यं नापत्तेः तयोर्जनका
नामास्यभवानां वायुसंयोगानामेतुल्यत्वात् तस्मादास्यभवानां कंठादीनामेव ग्र
हणमिति वाधनायत त्सार्थक्यात् आस्येति किम् नशौ ऋ रो ऋ शीति लोपामा भून् प्रपत्ले
किं वाक् ख्यातति प्रेतिकिं शचयोः श्वासाघोषविवारारव्य वाह्य प्रयत्नसाम्ये न तत्रैव दे
शात् कस्यचित् स्थानमिमाशंकायामाह अकुहेति यद्यपि सवर्णोच्चारणे कंठव्यापार आवश्य

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

दीनां नासिकास्थाने नोक्तं मूले एकोयमात्मीयं द्वकं नाम तस्य गुणभेदादन्यत्वं भवति
अन्यादिदेशीत्वमन्यदित्युक्तमिति सिद्धांतैर्भाष्येण तथैव प्रतीतेः अत्रामात्र द्रव्यगुण
तत्वादीनां गुणव्यवहारस्तु सावर्ण्यानुपयुक्त वायुसंयोगत्वांतर नस्यपरिच्छेदोपयोगि
त्वरूपसादृश्येनेति बोध्यं द्रादीनां तु न द्रुणसहित स्वरूपानुपलंभे नोभयावच्छेदेनवा
गुसंयोगांतरमेव स्वरूपोत्पत्त्या स्वरूपतेति बोध्यं विनिर्गमनाविरहेणाभयोः स्थान
त्वमनुस्वारयमानां चेति शीक्षायां चेन ह्रस्वी नाम पि संग्रह इति युक्तमनन एव कंठ्याकार
नासिक्य इत्याद्युक्तौ नासिक्ययमानुस्वाराणां विनिस्थानानीत्युक्तं प्रातिशाख्ये नासिकाङ्ञणन
मा इति तद्व्याख्यातारः कङ्योः सावर्ण्यं नु भवत्येव अस्यास्तु स्वदेशाप्रपत्त्यमिति
वार्तिके किमस्योपादाने प्रयोजनमिति प्रश्नो प्रयत्नविशेषणमस्योपादान
निरुक्तौ तद्भावतीत्वे न वा स्वप्रयत्नानादर्शे यथा तृतीयास्तथा पंचमानुनासि अ२
क्यमेवामाधिकोगुणः इति भाष्येण तस्य वा स्वप्रयत्नत्वोक्त्यात्र सूत्रे नासिका

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

याऽऽस्यशब्देनात्रत्य प्रयत्नस्य च प्रयत्नशब्देनाग्रहणाबोधनात् नासिकाऽऽस्यवा
स्येतिवदतां मते तद्ग्रहणाभावाच्च अत एव बाह्यप्रयत्नानुपक्रम्या मोनुनासिकानद्धे
नादिनोहकशः स्मृताः दूषणादायणश्चैव श्वासिनास्सुखफादयः इ ष च्छ्रुरा साश्वरो
विषादित्युक्तं शिक्षायाम् नादिति संवारघोषयोरुपलक्षणं श्वासेति विवारश्वासयोः
१५ नचूावित्युपलक्षणार्थश्चैः सर्वस्य स्मृत लकारस्य च अननुनासिकस्यादर्शनादित्यलम्
एदैतौरित्यादि लोकानुभवसिद्धाप्यनुवादकेऽत्र तपरकं शाल्वाप्रवृत्त्या स्मृतानामपि त
स्य्यानत्ववोधनम् तथा च पाणिनीयशिक्षा कंठ्यावहाविचुयशास्तालव्या ओष्ठजावु
पूस्मृर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृ
तो बुधैः एऐ तु कंठतालव्या ओऔ कंठोष्ठजौ स्मृतौ अष्टौ स्थानानि वर्णानामुरः कं
ठशिरस्तथा जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च हकारं पंचमैर्युक्तमन्तस्थाभि
भिश्च संयुतं उरस्यं तं विजानीयात्कंठमाहुरसंयुतमिति यत्तु दन्तोष्ठादिसमुदितं स्था

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

नमितिनेनु शीद्व्रायां दंत्यो ष्ठ्यां कंठ ता लव्या वित्या दीनन्त्र भ वइत्यधिकार विहि तय तः प्र
त्येकमनुत्त स्यापत्ते: दंतोष्ठ मि त्यादित्व संगतमेव स्वांग समुदायस्य स्वांगत्वाभाववद्व
शीरावयव समुदायस्य शरीरावयवत्वाभावे ल एतेन दंतोष्ठरूपमतिरिक्त स्थानमित्य
पास्तं अयोष्ठो स्थानान्तरीति प्रतित्ताविरोधाच्चेति दिक् सूत्रे पृशाब्द नविलक्षणार्थ बोधेपि
त्वाकूपत्व प्रपत्व योः पर्यायतेति ध्वनयन्नाह प्रयत्नो द्विधेति क्वचिद्यत्न इत्येव पाठः
व६ चतुर्धेति यत्नु स्वराणां मूर्धन्यं चैविवृतं करणं स्मृतं तेभ्योपि विवृतावेङौ ताभ्यामैचौ
तथैव चेति शीह्यवाकाद्विवृततत्व विवृततमयोः प्रतीत्या ति नाज्झलाविति सूत्रेणावि
वृतत्वप्रास्थानामेवो सावर्ण्य संगतो भाष्यारूढ्णामीषद्विवृतत्वस्य प्रतीत्या चतुर्धे
त्यसंगतमिति तन्न नाज्झलाविति सूत्रेण विवृततत्वव्याख्यानामेवोः सवर्णसंज्ञान
पत्तेर्बोधनमित्याशयात् भाष्यमतेन संवृतत्व प्रयत्ना: एवंचैदैतौ राधे तोष्ठ

ना१

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

न सावर्ण्यप्रसक्तिः प्रयत्नभेदादिति वोध्यं नाज्झलाविति सूत्रमपि प्रयत्नभेदज्ञापकं सावर्ण्याभावान्
वादकं सन्नस्यैव वोधकम् न एव भाष्ये तन्न वक्तव्यमिति नोक्तं स्पृष्टादीनामाभ्यंतरत्वं वोध्यं व्यु
भवति काकलकपर्यंतरूपास्यां नगीतततनस्थानेषु जिह्वाग्रादीनां स्पर्शे च स्थानत्वोपि विवृतस्पर्श
दूरावस्थान समीपावस्थानरूपाभ्यंतरकार्यकारित्वादर्शोन्तस्य व्यवहितप्राग्भावित्वाच्चेति वो
ध्यम् तत्र च वहूनामेकस्थानत्वेपि कस्यचिदुच्चारणे सम्यक् स्पर्शः कस्यचिदीषदिति शिक्षा
नुस्वकरोतीत्यनुभव एवैविवक्षितम् प्रयतनमिति नपुंसके भावे ल्युट् प्रयत्नमित्यपपाठः नङ्न
स्पपुंस्त्वात् तथा च शीक्षास्वराणामूष्मणां चेत्याद्यनंतरं अचोऽस्पृष्टा यणस्त्वीषत् नेम
स्पृष्टाः प्लुतः स्मृताः शेषाः स्पृष्टा हलः शोक्ता इति अचोऽस्पृष्टाः स्पर्शाभावविवृतत
रूपवंतः यणस्त्वीषदित्यनेन तेषामिषत्स्पृष्टत्वमीषद्विवृतत्वं शि च वोधितम् नेमस्पृ
ष्टं तेन शलामीषद्विवृतत्वं यणपेक्षयाधिकविवृतत्वं चेति वोध्यम् अत्र शीक्षोक्तं धर्ममव
तां आपकर्मं मादाय न सावर्ण्यमिति नियमश्च वर्गादिभिर्न सावर्ण्यमिति निनोचिनं नपारि
आप्यर
२६

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

परसवर्णः विवृतमेवेति प्रक्रियादशायां किं तत्त्वं प्रतिज्ञेयमित्यर्थः तेन दण्डाढकादौ दीर्घासिद्धिः अ
स्यासंवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात्सन्न स्यादिति भावः दीर्घाकारस्य
विवृततरत्वं तु पाणिनिशीक्षायां तत्त्वात्तेन अस्य प्रक्रियोपयोगीति दिक् तस्य प्रयोगासं
वृतत्वमानमाह अत्र प्रयत्नभेदाद्दीर्घाभावः अत्रोद्देश्यसवर्णग्रहणं जातिनिर्देशो वान
व्याख्यानात् अधिकारत्वे फलमाह त्रिपाद्यामपीति अत्र त्वष्टा गोधुक्ष्वानित्यत्रघत्वजस्त्वा
नुनासिकेषु भवद्भावानापत्तिरिति भावः वस्तुतो घत्वकृते ऽप्य इति वत्वापत्तेर्दोषः न च ततः
परत्वादपवादत्वादनुनासिकत्वयोस्तद्प्राप्तिरिति वाच्यम् अविप्रतिषेधे परमित्यस्याप्रवृत्तेः ह्यशत्वेन
त्रिपाद्यामप्रवृत्तेः पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येत्यनेन नैवस्य ह्यशत्वस्यैव बाध
नात् अत्र त्वष्टा परस्यासिद्धत्वविप्रतिषेधस्तत्रस्यसिद्धत्वात्परिभाषालामिवास्यापि कार्य तस्य ३
कालपक्षेते नेत्रैपादिकेनाक[illegible]र्षणापनेरत एव भाष्ये वत्वमेवापादितं अधिकारत्वादेव
स्तुत्वं ष्टुत्वमिति सिद्धे वाच्यमित्यादि चरितार्थमेव च यत्राणवृत्तिस्तस्यासिद्धत्वं पूर्वत्वं च बाधके वि

तस्य ४

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

त्सपादसप्ताध्यायाः क्वचित्सूत्रांतरसहितायास्तत्रायमर्थः हे ठ इत्यादावस्योपस्थितो वाक्यभेदे
नान्वयः ह्रस्वश्चो भवति इदं च शास्त्रं पूर्वत्रासिद्धमिति अत एव न भूते इत्यादिमित्तालिखे धडुप
पद्यते पूर्वत्रेतिसंग्राहकमेव प्रकृतं ग्राहिकमेव तु तत्तच्छास्त्रं प्रति तस्यासिद्धत्वं प्रतिपाद्यते तेना
पवादस्य यं प्रत्यपवादत्वं तत्रासिद्धत्वाभावेप्यत्रासिद्धत्वं भवत्येव असिद्धमिति सिद्धं निष्प
न्नं प्रवृत्तं सिद्धं अप्रत्ययविधावित्यादौ तथादर्शनात् तद्भिन्नमनिष्पन्नमप्रवृत्तं यद्यपि लोके
नाहार्यज्ञानस्यैव प्रवर्त्तकत्वं दृष्टं तथापि इह शास्त्रप्रामाण्यादाहार्योपि शास्त्रप्रवृत्तावप्र
वृत्तौ च नियामक इति बोध्यम् अत्र कार्यासिद्धत्वे ऽमूड इत्याद्यसिद्धिः अद ऽस ऽऔ इति स्थिते पर
कार्य त्वात्पूर्वत्वे तस्य सप्ताध्यायिस्थं इत्वमसिद्धत्वे ऽपि देवदत्त हंतृ हत इत्यापेनाकारभावे तत्पररूपा
धानापत्तिः अतिदेशस्यारोपरूपत्वान्निरधिष्ठानारोपासंभवेन कार्यप्रवृत्तेरप्रपहेत्वाव
रूपकत्वात् शास्त्रासिद्धत्वे तु यत्राप्यंतरंगत्वाक्षेपादिकं प्रवृत्तं तत्रापि तत्तच्छास्त्रे एवाभावारो
पेण तल्लिङ्गत्तिचेरभावे प्रादेशात्मभावोल्लेख्यजातित्वेध्यभावस्य जायमानकार्यत्वा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

देशएवस्यानिवृत्त्याप्रवर्त्तते नाहि रजतभ्रमस्य शुक्त्यावृत्तिः शुक्तिं नगोचरयतीति नदोषः
कस्तत्सहप्रसंगस्तत्राहृतिरेवाभावारोपितः नचपूर्ववत्रनेसेवसूत्रमास्त्विति वाच्यं पूर्वशास्त्र
प्रवृत्तौ निषेधस्य सर्वेन लोपस्त्विति सूत्रासंगतेः तद्विनियमार्थत्वहीत्याराजनस्येत्यस्यांर
श्रायां कस्यापि पूर्वशास्त्रस्याप्राप्तेस्तन्निषेधाऽप्रवृत्तौ नलोपेजाते भुक्तवंतमिति न्याये
नैतदप्रवृत्तौ राजान्वेत्यादौ दीर्घसिद्धौ नियमानुपयोगात् राजभ्यामित्यादावपि दीर्घप
त्तेरप्राप्त्या पूर्वशास्त्रविषयसंभावनायामित्यर्थे राजभ्यामित्यादौ न लोपस्य पूर्वविधौ दीर्घविध
यसंभावनयासर्वथा नलोपापत्तेरिति दिक् वास्तवप्रपत्ताः इतिकाकलकाधस्ताकुलविवर
संकोचविकाशस्वासोसतिध्वनिविशेषस्वरूपैघो [illegible] वातस्य दौर्बल्यत्वमहत्वस्वरूपकार्य
करत्वमेवांतयाहि अग्रात्मनो [illegible] वृत्त्याससमेन [illegible] र्यान्मनोपेक्षविवक्षया मनः कायाग्निमा
हंति सप्रेरयतिमारुतंमसोद्दीर्ण हृष्वधिहतोवक्रमापाद्यमारुतः वर्णान्जनयते
इतिशीक्षायामुक्तम् अग्रात्मातः करणसंस्कारस्वरूपेणस्वगतानन्तप्रयत्नविक्षुब्धास्य

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

वृत्या समैत्यैकां बुद्धिं विषयान् हृत्वा तद्बोधने छ याम नः प्रेकं करोति । तेति ॥ शि छावन्मनः का
यांगिं जठरमग्निमभिहंति स कायाग्निः सोदीर्णः उदीर्णः उर्द्ध्वं प्रेरितः इत्यादि स्तद्दर्थः सोंव वे
शब्दप्रयोगेछ योत्तत्पयत्नाभिहताग्निना नाभिप्रदेशात्प्रेरितो वायुर्वेगान्मूर्द्धपर्यंतं गत्वा
प्रतिनिवृत्तो वक्त्रं प्राप्य यत्नसहायेन तत्तत्स्थाने षु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्या
हत्य वर्णानभिव्यनक्ति ततो यत्नविशेषेण गलविवरविकाशादीन्करोति तत्र ये तत्तत्
स्थानाभिघातकायत्नास्तेऽस्यांतर्गतत्वात्पैकारत्वादाभ्यंतराइत्युच्यंते गलविवर
र्यक विकासादिकराऽप्रास्यबहिर्भूतदेशकार्यत्वाद्बाह्याइति मात्राकालिकत्वादिरूपह्रस्वत्वादिकं
तु वाय्वल्पमहत्त्वकृतमिति नाभिप्रदेशात्प्रेरकयत्न एव कश्चि- द्विलक्षणस्तस्य वायोरे
रयति कश्चिदधिकमि[illegible]ति तस्य वायुप्रेरणरूपं कार्यमास्यबाह्यदेशमिति तदपि वाह्य
मेवांतरावा इउ एतस्त्रे भाष्ये ह्रस्वादि । जनकयत्नोऽस्य विशेषेण न सवर्णसूत्रे ग्रहणमि

स्या १

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

तुल्यं यद्यप्येकएव यत्नः सर्वकार्यजनकोवर्णनाशकश्चेति परः सन्निकर्ष इति सूत्रे भा
ष्य उक्तं तथापि तत्तत्कार्यभेदोपाधिना एकस्मिन्नपि भेदमारोप्य तथा व्यवहार इति बोध्यं
उदात्तादिजनकयत्नस्याभ्यंतरकार्यकरत्वेपि उदात्तादिशब्दैर्विना बोधितानां तेषामनुः
दात इत्यनेन विवृताद्यबोधनात् सुवर्णसंज्ञानुपपत्तेः त्वांतरस्य परीक्षापत्तत्वरूपसाहचर्ये
न बाह्येष्वगणनमद्दं हत्वत्वादेरानुनासिक्यस्यापलक्षणम् पारइति शाबसाग्रनुप्रदानं
बाह्यप्रयत्न विवृतएवतदिति तदभिव्यक्त्युत्तरं जायमाने कंठविवरविकासे तेषां कर्तृत्वविव
क्षावोध्याविवारणं बाह्यप्रयत्न इति भावः अन्त्यौत्त्विति वर्गेतृतीयचतुर्थपंचमास्तेमाहकारा नय५
नुस्वारोपरलवाइत्यर्थः नादभागिनस्तत्प्रयत्नकाः यद्यपि खयादिषु घोषाघोषान्यतरप्र इत्यर्थः ६
यत्नमात्रेणापि प्रक्रियोपशानिर्वाहस्तथापि शिक्षानुरोधेनान्यथा भुक्तिः अल्पासवोऽल्प
प्राणा यत एतदुच्चारणे प्राणानामल्पत्वमिव भवति वर्गेष्विति विद्यमानानामितिशेषः
पूर्वेसंपूर्तिः साहर्षपंयत्नकृतं नाम अनएवायोगवाहरूपमानां गणानेभाष्ये चत्वारश्चयमाः
वर्गमिति निर्धारणेषष्ठी अत्यन्तमादितिशेषः २

२१ x

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative.

स्पृताइति पाणिनीशीक्षाचसंगच्छते अपंचवेदणवनदाह प्रातिशाख्येइति अन्येत्वामिति अचा१
प्रत्काम्पहलांचेत्स्पर्षः परलवाक्येति चेनाचामपिग्रहणं सपांसुलुगिति सूत्रे इकारस्यांतर्यतो
इकारइतिभाष्यात् घोषसंवारनादाल्पप्राणत्वमचाम् अन्यथाघोषवारनादानंगीकारेया
तरेपवर्गेपणस्यातामम् अल्पप्राणत्वानंगीकारेद्वितीयचतुर्थयोःस्यातामम् अचांघोषत्वंपरःसन्नि
कर्षइतिसूत्रेभाष्येस्पष्टम् अन्येइति द्वितीयचतुर्थैस्तृतीयप्रथमौशषसहा अपोगवाहाश्चेत्स्पर्शाः
यद्वाप्लुतीयप्रमानांवाल्पप्रयत्नकथनं स्वरूपानिर्णयाय ननुसावर्ण्यंतरतम्यपरीक्षाद्यु
पयोगीतिवाध्यम् अनुपयुक्ताइति तुल्यास्यसूत्रे प्रशब्दग्रहणादुपयुक्तत्वेपिहिशच्छपोरपि
सावर्ण्यं स्यादितिभावः अंतरतम्यपरीक्षाचघोषवतई स्यादिनातत्रस्फुटीभविष्यति स्पर्शाः
तस्यद्वावहायीः अंतस्थाः शाद् अधारंतः स्पर्शाभ्यणोरंतर्मध्येतिष्ठंतीति तद्वर्थः उष्माणइति
उष्मावायुस्तत्प्रधानाः स्पर्शाः सोष्माणइत्यस्यवायुनासहवर्त्तनइत्स्पर्शाःइति प्रातिशाख्य
भाष्येस्पष्टम् यद्यपिवर्गद्वितीयचतुर्थयोरपिस्यानंतरतम सूत्रभाष्यादूष्मत्वतस्यापिवि

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

हतम्रूप्रणामित्यत्र तरावगर्हं ते अत्यया कणादीनां सावर्ण्यं नापत्तो ना ज्ञत्वा विति नि दे
शासंगतिरिति भावः अचः स्वराइतिउहानादिभिः स्वपमे वराजंतेइतिमुत्पते स्तत्रूमत्वादु हाना
दयोपि स्वराइत्युच्यंते कृपाभ्या मितिरवफयोरभ्युपल्लुक्षणं अंग्रइत्युपलक्षणमिकारादेरपित
दाहाचः परावितित्र ल्लवर्णयोरिति अयाच ल्लवर्णे ऐति विग्रहः अल्पकेइतिप्रकृतिभावः एत
दर्थमेव वर्णोपदेशे ल्लकारपाठः अन्यथा तस्यासत्वशंकृपा अस्य वचनस्यैवाशंक्यत्वे स्यात
व्वतितंचेदमे ओडितिसूत्रशेषे भाष्ये तत्रहि संध्यंते स्मादोहल्लो नंतराइतिसूत्रेत्र
माहारघट्के व्यापिग्रहणं करणाश्रयवृत्सामाना ग्राकालस्य मच्छायादेरणुदित्सूत्रेण ग्रादि
पि ग्रहणेन ग्रहणं व्यंजनाभ्यो विधिन प्राप्नोति इत्याशंक्य मात्रकव्यंजनानुपदेशात् अ
नुपदिष्टस्यासत्वात् असत्वतिपत्तेरसंभवत्वाल्ल अणुदित्सूत्रेण तद्ग्रहणमिमुक्तं न च
त्कुप्रधिरिव स्यादावन्तइति निषेधात् ज्ञतानापत्तिः ऋल्लवर्णयोः पृथगनुबंधक
रणे नश्चक्षिन्यरस्य राहे कत्वकल्पने नादेशात् अकारहकारयोरिति एकारस्य ताल

ग्रा

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

अत्र मोकारस्यौष्ठ्यत्वमिति मते एकार शकारादीनामप्युपलक्षणमिदम् एतेनाकुशलावित्वे ८
वस्तूत्रयित्नुमुच्चितमपित्त्यपास्तं ह शिचेत्येवसिद्धे अनोरारि त्याकारे प्याहूतस्यर्थम् सूत्रे द्विवचनो
पपत्तये मध्यमपदलोपसमासं दर्शयति आकारसहितइति अतएव वेलास्विति निर्देश उपपद्य
ते समाहारद्वंद्वे तु ह्रस्वप्रसंगः अ ज्ञालिनिसमाहारद्वंद्वं कृत्वा आपरे न द्वंद्वे तु अजिह्वाल्विर
घ्याकारस्य सावर्ण्यं न स्यादिति भावः अतएव भाष्ये प्रयत्नभेदेनैवासावर्ण्यभावः साधितः श
ते ष्वपरेष्विति इदमप्युपलक्षणं एते ष्वविद्यमानत्स्वेष्वपि बोध्यम् तेन ह्कारादीनामकारादिषु
परतो दीर्घादि संग्रहः अच त्वस्यादिति अव्यपद बोध्यत्वं स्यादित्यर्थः इदं प्रत्याहारघटके व
पिग्राहकशास्त्रप्रवृत्तिरितिमतेनव्याक्षिपद्दते च बोध्यम् अणुदित्सूत्रेण ह्रस्व सवर्णबोधकत्वात्र अ
विधीयते सवर्णस्येत्यस्य बोधकइति शेषः आहे दौ सवर्णग्रहणवारणायाह प्रतीयत इ
ति परे तु अप्रत्ययग्रहणमेकदेशानुमतम् भाष्यमानेन सवर्णानां ग्रहणं नेत्यपरिभा
षा त्वाप्यतो ज्ञकम् प्रत्ययपदस्य तदर्थत्वं तु प्युकम् वार्त्तिककृतादित्वकित्त्वमित्युपसं
ख्यानोक्तेः भाष्यकृता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तेः स्यादाद्यिपसद्दिनिस

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

उपेत्यस्यनिषेधेमाति २

न४

त्रेभाष्ये ध्वनितमिदम् तत्र हि किमर्थमादित्युच्यते ज्यादइत्येवोच्यतां क्रूरूपासिद्धिः अंतर्यतोदी

र्घस्यस्थितिर्धीभविष्यति एवं तर्हि इदमेव ज्ञापयति भवत्येषा परिभाषा भाष्यमाने नेस्यादि त्वदुक्त

व्याख्याने हि पूर्वपक्षस्थितिज्ञांतयोरपि निर्देशत्वात्पंक्तिः जातिपक्षेप्य नपैव परिभाषया सवर्णग्र

हणं वारणीयम् व्यक्तिपक्षे गुणाभेदकत्वं प्राप्तं च वारणीयम् तेन घटे दित्यादौ नानुनासिकोव

दि४ कारः एतेनाज्झिदित्येव सिद्धेः अणग्रहणे नाणसुगुणभेदकत्वं ज्ञाप्यत इति परास्तमित्याहुः न

नुचोरित्याव नुवादेकथमदित्वमिति चेन्न व्याकरणांतरेणैवामुदित्संज्ञकत्वेनाहेयत्वात्

उपदेशावस्थाकरणसाधनत्वेन शास्त्रपरत्वेऽस्यापि शास्त्रत्वेनेत्वप्रवृत्तेः सुलभत्वाच्च चेमि

त्यकमहुत्याहोदित्वेति यचविसर्गदाय सवर्णे नोऽप्रसिद्धास्तथापि त [illegible] दवयवचारि

ग४ सवर्णानांतत्सवर्णबोधा ह्रस्वाकारादेरपि कालपुरुषाद्युपाधिभेदेन स्थानेभ भेद

मारोप्यतुल्यस्थानत्वे स्वरूपपादम् अत्रेति ग्राहकसूत्रे एवेत्यर्थः व्याख्यानादिति भावः उप

सर्गादितीत्यादि न परकरणादिति नु न पुंकम् लकारग्रहणे न चारितार्थ्यात् एवमणापि प

रेणैवाचिम्नुइति सूत्रैः इत्येव सिद्धे प्वोरिति गुरुनिर्देश शाश्वाख्यानाच्चैति लणसूत्रे भाष्यास्य

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

M-60

वम् नन्वेवमस्य च्चावित्वादौ सवर्णग्रहणं न प्राप्नोति ॥ अण्ग्रहणेन वर्णसमाम्नायस्थानामे
व ग्रहणे न णकारादि चिन्हे न प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्रापि वर्णोपस्थिते भु उच्चारितानभेदेन
गृहीतेषु सूत्रस्थ उच्चारितार्थे न व्यक्तिपक्षे तत्रान्यत्र व्यक्तौ भेदे न प्रकृते प्रत्याहारघटक द्वितीय
वर्णादौ चोच्चारितस्यैव ग्राहकत्वाद प्रवृत्तेरिति चेन्न जातिपक्षे ऽण्ग्रहणेन दोषाभावात् ॥ अनन्तरावाने
कनकारादौ नाकृत्यादिसिद्धिः सूत्रे ऽण्ग्रहणं च नकारपरम् ऋ लृ वर्णयोः सावर्ण्यमित्यनेनजा
तित्वस्यैवातिदेशेनापसर्गादि तीत्यादौ न दोषः एतद्व्यतिरिक्तसवर्णे समानजातित्वसत्त्वात् प
य्यगनुबंधकरणाच्च न ऋदित्वादित्वप्रयुक्तकार्यसंकरः व्यक्तिपक्षेऽइउण् सूत्रशेषे भाष्यरीत्या
तपरसूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहणनियामकत्ववद् दृष्टस्य यद्दृत्तस्य योगविभागे नैप्राप्त तत
अग्रहणसवर्णनिषेधकत्वात्परादीनामइत्वाऽऽदिविधेपदोषः एवं गुणाभेदकत्वप्राप्तसवर्ण
ग्रहणनिषेधकत्वमप्यस्यैवोध्यम् सामर्थ्यादि ... तएचोऽयवायाव इत्यादौ स्थानेंऽतरतमसूत्रे
णैव निर्वाह इति वृत्तौ स्वाभाविमित्यत्रेऽग्रोऽइतिस्वरूपेण पाठो वृद्धिरादैजित्यत्रापि ... नैवपाठं
तत्र गुणसूत्रेच परस्परसवर्णसंज्ञावादिमनेन च तु अण्ग्रहणसत्त्वात् ॥ अत्रैतत्तत्रैवपर्याप्तम

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

२१